- Title – कुवलयानन्द (अलंकार चंद्रिका टीका)
- Accession No – Title –
- Accession No –
- Folio No/ Pages – 81/162
- Lines-
- Size
- Substance Paper –
- Script Devanagari देवनागरी
- Language – संस्कृत
- Period –
- Beginning –
- End –
- Colophon-
- Illustrations -
- Source -
- Subject - काव्य शास्त्र
- Revisor -
- Author - वैद्यनाथ

1. Remarks- अपूर्ण (13-26, 41-81, 83-91, 93, 97) अनुपलब्ध

पूर्ण

व

श्रीमतेरामानुजायनमः नमस्त्रिभुवनानंदकंदाययदुकुलार्णवात् आविर्भूतायमहसेमुक
लायकलापिने अनुचिंत्यमहालक्ष्मी हरिलोचनचंद्रिकाम् कुर्वेकौतयानंदसदलंकारचं
द्रिकाम् २ चिकीर्षितविघ्नसिद्धयेस्वेष्टदेवतांस्तौति अमरीति अत्रचरणमेवपंकजमि
निमयूरव्यंसकादिसमासाश्रयणात्परिणामालंकारः चरणेआरोप्यमाणस्यपंकजस्या
पिविषयचरणात्मतापत्तिंविनादुरितदूरीकरणक्रियार्थत्वासंभवात्परिणामः क्रिया
र्थश्चेद्विषयीविषयात्मनेतितल्लक्षणात् नचपंकजमिवचरणमितिपूर्वपदार्थप्रधान
उपमितिसमासएवास्त्वितिशंक्यम् अमरीणांकवरीभारस्यकेशपाशस्यसंबंधिनीसौ
गंध्यलोभात्तत्संसक्तायाअमरीतयामुखरीकृतमिति विशेषणस्यानुगुण्याभावात्तस्य
पंकजगतत्वेनैवप्रसिद्धेरितितद्विशेषणेवातेनचपादपतनेनाभिव्यज्यमानागौरीविषया म
मुरांगनागतारतिः कविगतांतांपृच्छातीतिप्रेयोलंकारोवोध्यः परस्परेति प्रांचौपुराणौ पि
जायापतीअर्थादुमामहेश्वरौनुमः किंभूतौ प्रपंचस्यजीववर्गस्यमातापितरौ मातापितरू

1 १

ष्यां परमेश्वरः

योनि रुपाधि[illegible]कृपाश्रयत्वात् हितोपदेष्टृत्वाच्च तयोः परस्परसंबंधित्वात्तपः संपत्तेः फल
वदाचरितं परस्परं स्वरूपं ययोस्तौ अत्र परशब्दस्य क्रियाविनिमयविवक्षायां कर्मव्यतिहा
रे सर्वनाम्नो द्विर्वाच्ये इति वार्तिकेन द्विर्भावे असमासवद्भावे पूर्वपदस्थस्य सुपः सुर्वक्तव्य इत्य
नेन सुपः स्वादेशे च परस्परशब्दव्युत्पत्तेः पार्वती तपःसमृद्धिफलापितृ परमेश्वरो पःसंपत्फ त
लापिता च पार्वती इत्यर्थो लभ्यते तपः संपत्तेश्च फलं निरतिशयानंद इति तदुपमया परस्प 3
रप्रेमास्पदत्वलक्षणः शृंगारो व्यज्यमानः सौभाग्यातिशयव्यंजनमुखेन शिवयोर्भक्तिप्रकर्षं
पर्यवस्यतीति सहृदयैराकलनीयम् मातापितराविति रूपकाभ्यामुक्तोपमयोः संसृष्टिः
परस्परं चोपमयोः फलापितेत्येकवाचकानुप्रवेशलक्षणः शंकर इति दिक् संप्रति प्रतिपादयि
तानामलंकाराणां व्युत्पत्तेः स्वतो पुरुषार्थत्वाफलत्वायोगात् रसास्वादोपयिकत्वेऽफलत्व तस्माः
प्रेक्षावतां प्रवृत्तौ प्रवर्तयेस्तच्च पितृ शृंगाररसाधिदेवतं श्रीकृष्णं प्रति रसास्वादानंदं प्रार्थयते
गप न

उद्घाटेति समुकुंदो मेमत्वम् शाश्वद्वंवां शाश्वतिकम् भगनावरणतया सदा प्रकाशमानम्। श्रेयो विगलितवेद्यांतरमानंदम् रसो वै सइति श्रुतेः रसपदाभिधेयम् विशनुददात्विति यद्यपि। यथाश्रुतेमुक्ति प्रार्थनायाः प्रकृतेरसंगतत्वापत्तेः सः कः योधन्यैर्महामहिमपुण्यशालि। भिर्नारदादिमुनिभिः योगकलया योगकौशलेन हृदया बुद्ध्या उदारसो मध्यवर्तिनो हृद यपुंडरीकस्य कोशं मुकुलमधोमुखं तत्र यावर्तमानमुद्धाय रेचकप्राणायामेनोर्ध्वमुखं। कृत्वा चिराद्बहुकालं यथारुचि यथेच्छं गृह्यमाणो पि रामकृष्णाद्यभिमतमूर्तिध्या नगोचरीक्रियमाणोपि यतिः पूर्णरूपमस्य यैर्यथाभूतोऽपरिच्छिन्नब्रह्मस्वरूपः अ। त विरतं निरंतरं मुक्तिदशायां स्फुरति प्रकाशते इति विरोधालंकारः औपासनिकरूप स्य कल्पितत्वेन च तत्परीहारः अथवा योगिभिरप्यचिंत्यस्वरूप इति माहात्म्याति। शयवर्णनम् अन्नयोगिगतभगवद्विषयकरतिभावस्य कविगतापत्तिप्रत्यंगतया प्रेयो

लंकारः चिकीर्षितस्य ग्रंथस्य प्रयोजनाभिधेये दर्शयति अलंकारेष्विति एतच्छोभयोरन्वयि
अलंकारेषु अर्थालंकारेषु तद्विषये बालानामव्युत्पन्नानां तेष्ववगाहनस्य व्युत्पत्तेः सिद्ध
त्य ये इत्यर्थः तेषां योर्लक्ष्यलक्षणयोः संग्रह इति निर्दिष्टापेक्षत्वात्समासः लक्ष्यमुदाहरणम् अ
लंकारत्वं च रसादिभिन्नव्यंग्यभिन्नत्वे सति शब्दार्थान्यतरनिष्ठा या विषयता संबंधावच्छि
तर न्ना चमत्कृतिजनकतावच्छेदकतावच्छेदकत्वम् अनुप्रासादिविशिष्टशब्दज्ञानादुप
मादिविशिष्टार्थज्ञानाच्चमत्कारोदयात्तेषु लक्षणसमन्वयः शब्दार्थयोर्ज्ञाननिष्ठचमत्कृ
तिजनकतायां विषयतयाऽवच्छेदकत्वेऽपि ततद्विशेषणीभूतानुप्रासोपमादेस्तन्निष्ठावच्छेद
कतावच्छेदकत्वात् रसवदाद्यलंकारसंग्रहाय व्यंग्योपमादिवारणाय च भेदद्वयगर्भसत्त्वं
तपदोपादानम् परकीयग्रंथापहारशंकानिरासायाह येषामिति येषामलंकाराणां चं
द्रालोकाख्ये ग्रंथे तत एव ह्यस्यानंतरं लिख्यते इति शेषः तत्राप्युक्तानामपि केषांचिदलेखनात्
प्रायस्त्वक्रम् यथानंतरश्लोकस्योत्तरार्द्धे तत्रैवं दृश्यते हृदये खेलतोरुच्चैस्तन्वंगीस्तन

कु॰ टी॰
३

योरिवेति स्वयं त्वन्यदेव विरचितमिति एवं च तत्तदीयत्वेन कथनादाशंकानिरासः संप्रत्यर्थालंका
रेषु निरूपणीयेषु बहुलालंकारघटकतया प्रसिद्धत्वाच्च प्रथममुपमालंकारं लक्षयति उप
मेति अयं लक्ष्यनिर्देशः शेषं लक्षणम् सादृश्यपदस्य लक्ष्मीचमत्कृतिविशेषजनकतात्तद्विशि
ष्टं सादृश्यमिति यावत् धर्मिधर्मयोरभेदोपचारात् लक्षणं व्याचष्टे यत्रेति यत्र काव्ये वृत्ति
त्वं सप्तम्यर्थः तच्च शक्तिलक्षणान्यतरसहकारेण बोधकत्वसंबंधेन उपमानमधिकरणं चंद्रादि उ
पमेयं वर्ण्यमानं कामिनीवदनादि सहृदयः काव्यभावनापरिपक्वबुद्धिः [illegible]दापती
ति नियमरूपा यया साव्यंजनेत्यर्थः अत्र चोपमानोपमेययोरिति स्वरूपकथनं न तु लक्षणां
तर्गतम् व्यावर्त्याभावात् आत्माश्रयापादकत्वाच्च उपमानत्वोपमेयत्वयोः रूपमाघटि
तत्वात् एतच्चाग्रे व्यक्तीभविष्यति इत्थं चालंकारत्वे सति सादृश्यमुपमालक्षणम् बोध्यम्।
एवमग्रेप्यधिकारप्राप्तमलंकारत्वविशेषणं बोध्यम् हंसीत्यादि अत्र तावदिवार्थसादृश्य
निरूपितत्वसंसर्गेण हंस्यादेरन्वयः सादृश्यं च प्रयोजकत्वसंसर्गेण स्वर्गंगावगाहनाश्रयत्व

लेकार

6

राम
२

कर्मेका

का ख

रूपेसाधारणधर्मेतस्यचस्वरूपसंबंधेनकीर्तौ साहश्यंनिपातार्थतयानामार्थंप्रति साक्षात्संबंधेन विशे
ष्यत्वेनविशेषणत्वेचबाधाभावात् तथाचहंसीनिरूपितसाहश्यप्रयोजकस्वर्गोगावगाहनाश्रयत्ववती
कीर्तिरितिबोधः। नचैवंस्वर्गोगावगाहनमिवशब्दस्याग्रिमग्रंथेधात्वर्थस्यसमानधर्मतोक्तिवि
रुद्धेतिवाच्यम् तदाश्रयत्वस्यसमानधर्मत्वेतस्यतथात्वस्यौचित्यात् विरोधाभावात् तथासति
तत्रैवसाहश्यस्यकुतोन्वयोनेतिचेन्न धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारतासंसर्गेणशाब्दबो
धेविशेष्यतयाविभक्त्यर्थोपस्थितेर्हेतुत्वात् नचनिपातार्थभिन्नवृत्तित्वेनप्रकारताविशेष
णीयेतिवाच्यम् घटोनपश्यतीत्यादौघटाद्यन्विताभावस्यकर्मतासंसर्गेणदर्शनेऽन्वयापत्तेः यदि
तुधात्वर्थेपितात्पर्यविषयसाहश्यान्वयोऽनुभवसिद्धः तदाधात्वर्थनिष्ठविशेष्यतानिरूपितप्र
कारतासंबंधेनान्वयबुद्धिंप्रति नञ्जन्योपस्थितेः प्रतिबंधकत्वमात्रंपरिकल्प्य घटोनपश्यती
त्यादौपूर्वोक्तान्वयबोधोनिराकरणीयइतिदिक् एवमरविंदमिवसुंदरंमुखमित्यादावरविंदनिरू
पितसाहश्यस्यप्रयोजकतासंसर्गेणसुंदरपदार्थैकदेशेसुंदरत्वे ●ऽनुभवतात् अन्वयस्तद्विशि
ष्टस्यचाभेदेनमुखादौ इत्थंचारविंदनिरूपितसाहश्यप्रयोजकसौंदर्यवदभिन्नंमुखमित्यन्वयबो
धः; अरविंदसुंदरमितिसमासेत्वरविंदपदेनारविंदनिरूपितसाहश्यप्रयोजकंलक्ष्यते तत्राभेदे

पि

दादि

श्री

कु. टी.
८

नपदार्थैकदेशे सौंदर्य्येऽन्वेति एवंचारविंदनिरूपितसादृश्यप्रयोजकाभिन्नसौंदर्य्यवदभिन्नं वदनमि-
तिबोधः । देकदेशान्वयायोगादरविंदपदमेव लक्षणया सर्वार्थबोधकं सुंदरपदं तु तात्पर्य्यग्राहकमि
त्येके । अरविंदमिव वदनमित्यत्रारविंदनिरूपितसादृश्यवद्वदनमितिबोधः । सादृश्यस्य निपातार्थ
तया भेदेन नामार्थान्वये बाधकाभावात् । अरविंदमिव भातीत्यत्र भातेर्ज्ञानार्थकत्वेऽरविंदपदस्या
रविंदनिरूपितसादृश्यप्रकारकज्ञानविषये लक्षणा तस्य चाभेदेन मुखादौ अन्वयः । शेषं तात्पर्य्य
ग्राहकम् । पूर्वोक्तदिशा वा सादृश्यस्यैव प्रकारतासंसर्गेण धात्वर्थेऽन्वयः । अत्र सौंदर्य्येणेति धर्मो
पादाने तृतीयार्थस्य प्रयोज्यत्वस्य सादृश्येऽन्वयात् सौंदर्य्यप्रयोज्यारविंदनिरूपितसादृश्यप्रका
रकज्ञानविषय इति बोधः । आद्यकल्पे तु अरविंदपदमेव सर्वार्थबोधकमिति तात्पर्य्यग्राहक-
मिति ध्येयम् । इयं च सादृश्यपदार्थातिरिक्तत्वमते शाब्दबोधरीतिः प्रदर्शिता । तस्य समानधर्मरू
पत्वे तु चंद्र इव सुंदरं मुखमित्यादौ चंद्रवृत्तिधर्मवन्मुखमिति बोधः । अत्रैवाल्हादकत्वमिति समान
धर्मोपादाने इवार्थस्य धर्मस्याल्हादकत्वे पदार्थैकदेशेऽन्वयः । तदसहिष्णुतया तु चंद्रनिष्ठाल्हा
दकत्ववत्पाल्हादपदस्य लक्षणा । चंद्रपदं तात्पर्य्यग्राहकं । चंद्रसदृशमित्यत्राप्येकदेशे सादृ

स
त
र
राम
८

चा

शेषचंद्रान्वयः स संबंधिकत्वात् सदृशपदं वा चंद्रसादृश्यविशिष्टेलोत्तालिकम् अत्रैवाल्हादकत्वेनैस्पृता
वभेदलत्तीयार्थः तस्य च सादृश्यपदार्थैकदेशे धर्मेऽन्वयः तथा आल्हादकत्वाभिन्नं चंद्रवत् इति धर्मवदभिन्नं
मुखमिति बोधः सदृशपदमेव वा सर्वार्थबोधकमिति तत्तात्पर्यग्राहकमित्येवं विधान्वयसरणिश्रेण
यं तत्र तत्र शाब्दबुत्पत्ति निरूपणेऽनुसंधेयाः इत्यलं प्रसक्तानुप्रसक्त्या परिचिंतनेन पूर्णोपमेति इ
त्यनंतरमालंकारिकैरिति पूरणीयम् तत्वं च विशेषत उपात्तशाब्दश्रोति प्रतिपादितोपमानोपमेयक
च त्वे सति विशेषतः शाब्दोपात्तसमानधर्मकत्वे सति विशेषतः स्वरूपं निरूपं शाब्दगम्यत्वम् स्वपदम्
पमापदम् उपमानलुप्तायामपि लक्षणायोपमानप्रतिपत्तेः स्वद्वारेणापप्राप्तीति उपमेयलुप्तायां
स्मरवभूपंती त्यादावात्मनउपमेयस्याध्याहृतेनात्मानमिति शाब्देनवोधनात् उपात्तेति शाब्दविशे
षणम् एतमपितन्वीत्यनेनात्रोपमेयस्य काव्ये सदृशं तातदृश्यत इत्येवं विधायां लुप्तोपमायामुप
मानस्य सदृश पदोपात्तत्वात् विशेषत इति उपमेयोपमानतावच्छेदकरूपेणेत्यर्थः धर्मलुप्ताया
मप्युपमावाचके न सामान्यतो धर्मस्योपात्तत्वात् विशेषत इति उपमा प्रयोजकतावच्छेदकरू
पेणेत्यर्थः वाचकलुप्तायामपि लक्षणयोपमानादिपदेनोपमावगमात् तद्द्वारणाय विशेषतः स्व
निरूढेति उपमायां च निरूढलक्षणाया शाब्दाइत्याद्यमिप्रकोति सेवाहीताइवादयः अत्र निपा

९

घ

कु॰ टी॰
५

ग

तद्रूपस्येवादेरुपसर्गवद्द्योतकत्वमेव कथमन्यथा शरीरैर्हंसै रिवोदीच्यानुदतिष्ठन्तरसा निवेत्यादावुक्ता
दिपदोत्तरतृतीयादिसंगतिः उक्तादिरूढरूणा क्रियां प्रत्यकारणत्वात् इवार्थसादृश्यान्वयित्वेन क
रणीभूतप्रकारविशेषणत्वाभावाच्च द्योतकत्वेनतु उक्ताऽदिपदस्योक्तसादृश्यपरतयोक्तसादृश्यैः शरीरैरिति
विशेषणत्वेन तृतीयादिसंगतिरिति वैयाकरणमतं तु नादरणीयम् तुपास्यते रित्यादौ धात्वर्थ
सन्न क्रियायाम् कर्मकतयाँलकारानुपपत्तिरूपबाधकस्योपसर्गवाचकतायां निवेलादिवाच
कतायामभावेन दृष्टांतत्वे पमस्यस्फुटत्वात् विशेषणविशेष्ययोः समानविभक्तिकतायां वि
शेष्येणसहैकार्थ्यंभवेयत्र विशेषणं तत्र लिंगादयः। प्रायो विशेष्यस्याविशेषणेऽपीत्यनुशासनस्य
चोपमानोपमेययोरपि तत्संख्यालिंगसंख्याविभेदेऽपि उपमानोपमेययोः विभक्तिः पुनरेकैवउ
पमानोपमेययो रित्यनुशासनस्य सत्वेन उपमानपदोत्तरतृतीयादेः साधुत्वार्थतयोपपत्तेश्च
तस्माद्वाचकत्वमेवादीनां युक्तं चैतत् अन्यथा सकलालौकिकसंततस्येवशब्दप्रयोगेऽप्र
तीत्वस्य दत्तजलांजलित्वापत्तेः रूढिप्रयोजनयोरन्यतरस्याभावेन चंद्रादिपदेन चंद्रसदृशलक्ष
णायां निरूढलक्षणकत्वरूपनेयार्थत्वदोषापत्तेश्च अपि च इवादेर्द्योतकत्वनये चंद्रादेरुपमा
नस्य पदार्थैकदेशतया तत्र साधारणधर्मान्वयानुपपत्तिः तस्योपमेयमात्रान्वयांगीकारे लिंगव

कर्मे

राम
५

चनभेदस्यदोषत्वानुपपत्तिरितिदिक् उपमानेत्यादि उपमानत्वंचोपमानिरूपकत्वेन विवक्षितत्वम् तदाश्र

यत्वेन विवक्षितत्वंचोपमेयत्वं साधारण त्वंचधर्मस्यस्वारसिकमोपम्यारिकं बिंबप्रतिबिंबभावकृतंश्लेषकृ

तंवस्तुप्रतिवस्तुभावेनसमासभेदाश्रयणेनचेत्यनेकधा चित्रमीमांसायांप्रपंचितम् तत्रस्वगंगावगाह

नस्यतथात्वमोपम्यारिकंकीर्तेरिस्यस्वारसिकत्वाभावात् उपमानोदादित्ति वाचकस्योपादानेनिर्दे

रे षः कृतंधात्वनुप्रावेनप्रतिपादनंतदितिचिंतनीयम् साधारणप्रकारविशेषोपदर्शनायोदाहरणांतरमाह

यथावेति गुणदोषाविति गुणदोषावर्थात्परस्य गृह्णन्जानन् बुधःपंडितः पूर्वपूर्वनिर्दिष्टगुणम

शिरसाश्लाघते आंदोलितेनशिरसाभिनंदयति परतोनिर्दिष्टंदोषंकंठेनियच्छति निरुणद्धि वाचा

कंठाद्बहिर्नोद्घाटयतीत्यर्थः कइव इंदुक्ष्वेडौ चंद्रगरले गृह्णन् उपाददान ईश्वरइव सोपि हि पूर्वंचंद्रंशिर

षसाश्लाघतेतत्पूर्वकंधारयति परंगरलंकंठेनियच्छति स्थापयति क्ष्वेडस्तुगरलंविषमित्यमरः शंकतेयद्य

पीति साधारणः तत्वेनाभिमतोधर्मः गृह्णन्शिरसाश्लाघतेपूर्वमित्यादिनोक्तोयद्यपि नसाधारण नैकोपी

तिइतियोजना गृह्णन्नित्यादिनोक्तएकोपि नसाधारणोनेतिवा यथाश्रुतेसाधारण्यस्यसाधारणत्वाभावो

धर्म: धा

कु॰टी॰
६

केरसंगतत्वापत्तेः साधारणधर्माभावे हेतुः उपमानइत्यारभ्य इतिभेदाइत्यंतेनोक्तः समाधत्ते तथापीति वस्तुग
त्यासाधारणधर्माभावेपीत्यर्थः चंद्रगरलयोरित्यादि यथाक्रमं चंद्रगरलयोः गुणदोषयोश्चेत्यर्थः बिंबप्रति
बिंबभावेन प्रतीयमानसादृश्ययोरुपमानोपमेयधर्मयोर्भिन्नशब्दोपादानेन तत्वरूपेणाभेदात् अभेदाध्य
वसायात् एतच्च साधारणधर्मेत्यग्रेतनेनेन्दिवरम् ज्ञानादित्यादिना शिरसा वहता भिनंदनयोः केचस्या
नवहि वन्तु इत्यनयोश्च संग्रहः गृह्णन्नित्यादिना शिरसा श्लाघनेके हे नियच्छतीत्यनयोः संग्रहः अभे
दाध्यवसायादिति अभेदस्याध्यवसायात् आहार्यनिश्चयादित्यर्थः साधारणधर्मतेति साधारण
धर्मत्वाभिमानविषयतेत्यर्थः पूर्वस्मात्पूर्वोदाहरणाद्विशेषइत्यन्वयः नचैवं साधर्म्यप्रतीत्युपपादनेपि
वस्तुतस्तदभावात्कथमुपमालक्षणसमन्वय इतिवाच्यम् चमत्कारविशेषप्रयोजकसाधारणत्वाध्य
वसायविषयधर्मत्वस्यैवोपमानैर्लक्षणत्वस्येत्यभिप्रायादिति लोके बिंबप्रतिबिंबभाव[illegible]
[illegible]र्थः व्यपदेशस्य गगनजलाशयादिगत चंद्रादिविषयतया प्रसिद्धेः कथं तद्व्यपदेश इत्याशंका
यामाह वस्तुतस्त्वित्यादि आतिलकयोः तथाध्यवसितयोः पृथगिति भिन्नशब्देनेत्यर्थः बिंबप्रति
बिंबभाव इति बिंबप्रतिबिंबभावपदवाच्यत्वमित्यर्थः समयइति संकेत इत्यर्थः पूर्णायामुपमानाः

12

राम
६

दिसमस्तानियमप्रसक्तेः तद्विपरीतायांलुप्तोपमायांसर्वलोपनियमाशंकानिरासायलक्षणपूर्व
कंतांविभजते वर्ण्येत्यादिना चकारोवाशब्दार्थे तदनंतरंच्चलोपेइत्यध्याहार्य्यम् एवंचेत्तरोत्तर
योगाविवक्षयावर्ण्येभ्योपमानस्यधर्मस्योपमावाचकस्यवालोपे अन्यतमानुपादानेलुप्तो(
पमा साच एकद्वित्र्यनुपादानेरूपधाभिन्नेति पूर्वापराभ्यामुक्तम् तडिदित्यादीन्युदाहरणानि(
अर्थतोव्याचष्टे उपमेयादीनामिति वस्तुतोलाघवात् पूर्णाभिन्नत्वंलक्षणम्बोध्यम् लक्षणवा
क्यगतंक्रममपेक्ष्योदाहरणक्रमानुसारेण विभागंदर्शयति यथेत्यादिवाचकलुप्तेति वाचक(
त्वंचानुपूर्वीविशेषवत्त्वेपमाबोधने निरूढत्वं [illegible] निरूढलक्षणयावा तत्राद्यमिवा
देः द्वितीयंतुप्रभृत्यपदादेरितितदभावात्तडिज्जोरीत्यादिवाच्यलोपः समासानुशासने निरूढल
क्षणाव्यागमेपि आनुपूर्वीविशेषवत्तयाशब्दविशेषस्यतद्बोधनात् शास्त्रकृतइति शास्त्रप्र
युक्तइत्यर्थः कर्पूरंतीत्यत्रेति अत्रसर्वप्रातिपदिकेभ्यःक्विब्वावक्तव्यइतिविहितःक्विप्लु
प्तोपिस्मर्य्यमाणोधर्ममात्ररूपमाचारंबोधयति कर्पूरपदंचलक्षणया ~~कर्पूरपदंचलक्षणया~~
सादृश्यंतस्यचातिशक्तित्वेपूर्ववत्प्रयोजकता संसर्गेणाचारेन्वयोधर्मलुप्तत्वत्वभेदेनवस्तुत

B

क

कु॰

लुक्तिपलोपाप्रतिसंधानेपितथ्याबोधात् कर्पूरादिशब्दा एव कर्पूरसादृश्यप्रयोजकाभिन्नं तत्तत्सादृश्याभिन्नं
वाचारं लक्षयन्तीति युक्तम् ननु वाचकस्येवादेरनुपादानात् लोपो युक्तः साधारणधर्मस्य त्वाचाररूपस्य क्वि
उपात्तत्वात्कथं लोपस्तत्राह कर्पूरवदानंदात्मका चारार्थस्य क्विप इति कर्पूरस्येवेति इवार्थवृत्तिः आनं
दात्मकत्वाजनकतासंबंधेन वस्तुगत्या आनंदत्वरूपो यो आचारस्तद्बोधकस्येत्यर्थः ननु क्विपलोपा
ज्ञानेप्याचारप्रतीतेः कर्पूरादिपदानामेव तद्बोधकत्वपक्षे कथं धर्मलोपः संगमनीय इति चेत् न
अंशाच एवमपि तद्वाचकतया विहितस्य क्विपो लोपात् तल्लोपव्यपदेशः अत एव समानार्थ
कक्यचलोपात् तल्लुप्तत्वादित्याहुः नव्यास्तु धर्ममात्ररूपस्याचारस्योपादानेपि आनंद
त्वादिना विशेषरूपेणानुपादानात् धर्मलोपो युक्त एव अन्यथा इंदुतुल्यास्येत्यादेर्धर्मलु
उदाहरण ७
प्तास्यासंगतत्वापत्तेः नचैवं वजादावपि धर्मलुप्तास्यादितिवाच्यम् इष्टापत्तेरित्याहुः स्मर
वधूयंतीत्यत्रेति ननूपमानादाचार इति कर्मभूतादुपमानादाचारे क्यजो विधानात् स्मरव
धूमिवाचरतीत्यर्थ वज्ञामेप्यात्मानमन्यां वेत्ति कथं निर्णयस्तत्राह विशेषणेति इत्यनुरूपाच
रणस्य कांतिकरणकत्वरूपविशेषणस्य सामर्थ्यादित्यर्थः कांतेः स्वरसतः स्वीयत्वाव

राम ७

म स्य च

गमादितिभावः नचात्मनउपमेयत्वं तन्वीपदेनोपादानात् कथं लोपइतिवाच्यम् तस्याद्वितीयांतत
याकर्मभूतोपमेयासंबंधिकत्वात् आत्मानमित्यध्याहृतेनैवतद्बोधात् अत्रैस्मरवधूपदेनस्म
रवधूसादृश्यं लक्ष्यते तस्यप्रयोजकत्वसंसर्गेणाभेदेनवाचाऽन्वयः तथाच स्मरवधूसादृ
श्यशालि आत्मकोपमाचारस्तदाश्रयस्तन्वीतिबोधः काकतालीयेति वृत्तिविषयेसमास
विषयेज्ञापकादिति इवार्थसमासाभावे तद्धितविधानादित्यनेनेवार्थविषयसमासानुवादोऽनुपप
त्तिसिद्धज्ञापकइत्यर्थः उभयत्रकाकागमनतालपतनयोरुपमेयइत्यनंतांक्रमेणतिष्ठेवः
तेनेति काकतालसमवेतक्रियापरयोः काकतालपदयोरिवार्थेसमासेनेत्यर्थः काकता
लसमागमेति अयंभावः काकागमनतालपतनयोरुपमानत्वे तदुपमेययोः स्त्रीयात्मन
तन्वस्यानयोः पृथगनुपातत्वेनोपमेयतयान्वयायोगात् काकतालसमागमएवोप
मानम् तस्यच काकतालसमागमसदृशं काकतालपदार्थस्तस्यचाभेदेनस्त्रीयतन्वीस
मागमरूपेउपमेयेऽन्वयइति तमइति तादृशसमागमेनेत्यमित्यर्थः इतितदर्थइति काकता
लपदलक्षिततस्यकाककृततालफलोपभोगसदृशस्याभेदेनतन्वीरितिलाभरूपेणोपमेय

15

नान्वयादिति भावः अत्र पतनदलितमिति रहोदर्शनक्षुभितहृदयेति च बिंबप्रतिबिंबभावापन्नधर्मस्व
रूपकथनं न त्वेवमन्वयाकार इति ज्ञेयम् न च सकृद्दुर्घटेति ताभ्यां काकतालपदाभ्यां कथमुपमानद्व
यावगम इति वाच्यम् अनुभवानुसार्यनुशासनेन व्युत्पत्तिवैचित्र्यार्थस्य स्फुटप्रतिपत्तेरिति एवं द्व
रूपत्वात् पद्यं व्याख्याय तत्रोपमानलुप्तादीन् चत्वारो भेदानुदर्शयितुमाह तत्रेति काकाग
मनतालपतनरूपो योयं समागमलक्षणस्य तत्पर्णः इदं च काकागमनतालपतनयोरिवेति महाभा
ष्यगतविग्रहवाक्यविरोधशंकापरिहाराय यो क्रम समागमस्य तादृशक्रियाद्वारा भिन्नत्वेनोक्तत्व
त्वात् तस्योक्तार्थ एव पर्यवसानात् विशिष्टोपमायां विशेषणोपमावगतिर्वा समागमोपमायाम
व पि तदवयवक्रिययोर्यथायोगं गम्यमानामुपमानमभिप्रेत्य महाभाष्यकृतां तादृशविग्रहवाक्यप्र
णयनमित्याशयः धर्मस्यानुपादान इति तत्स्थानेऽभवत्किं ब्रूमीमिति इति भावः इत्यलंकार
चंद्रिकायामुपमाप्रकरणम् यद्यप्युपमाननिरूपणानंतरं तन्मूलालंकारेषु संभवत्सादृश्यानु
पमेयोपमैव प्रथमं निरूपयितुमुचिता तत्रापि तत्सादृश्यनिबंधनोऽनन्वयस्तथापि तं द्विती
यसादृश्यव्यवच्छेदफलकतया तत्तीयसादृश्यव्यवच्छेदफलकामुपमेयोपमामपेक्ष्य शीघ्रोपस्थि

ल्यम

इति पा० ८:

८

तिकमुपेत्यप्रथमं निरूपयति उपमानोपमेयत्वमिति उपमानत्वमुपमेयत्वं चेत्यर्थः द्वंद्वांते श्रूयमा
णत्वात् विवक्षितमिति विशेषः एकस्यैवैकस्यैव वस्तुनो यदुपमानत्वमुपमेयत्वं विवक्ष्यते तदनन्वयः
असंभवशंकां निराकर्तुमन्यत्रोदाहरणोक्तिः ननु कलहंसस्य भणितिरिव मतिर्मतिरिव चेष्टितमि
त्व दि रसनोपमायामतिव्याप्तिस्तत्रैकस्यैव वस्तुन उपमानत्वस्योपमेयत्वस्य च वर्णनात् अथै
कस्य वस्तुनो यदेकनिरूपितमुपमानत्वमुपमेयत्वं चेति विवक्षितम् एकस्य पदस्यावृत्तिकल्प
नादित्यं च रसनोपमायामत्यादेश्चेष्टादिनिरूपितमुपमानत्वं भणित्यादिनिरूपितं तूपमेयत्व
मित्येकनिरूपितोपमानोपमेयत्वविरहान्नातिव्याप्तिरित्युच्यते तदाव मिं वजलं जलमिवाव
मित्युपमेयोपमायामतिव्याप्तिः तत्रैकस्यैव वस्तुनो गगनस्य एकजलनिरूपितस्योपमानत्व
स्योपमेयत्वस्य च वर्णनादिति चेन्नैवम् एकस्यैवेति विरोधद्योतकेवकारबलेन स्वाश्रयनिरू
पितयोरुपमानत्वोपमेयत्वयोर्लाभेन कापि प्रसंगाभावात् अस्तिहि द्वंद्वे द्वित्वेत्यनन्वये तूपमा
नत्वमुपमेयत्वं च स्वाश्रयेंदुनिरूपितं न तु रसनोपमायामुपमेयोपमायां वेति संक्षेपः अनन्वय
पदप्रवृत्तिनिमित्तमाह वर्ण्यमानमपीति नान्वेतीति न संबध्यत इत्यर्थः साधर्म्यस्य भेदघटितत्वा
दितिभावः नन्वेवं सत्यसंबद्धप्रलापत्वापत्तिरित्यत आह अनन्वयिनोपीति वाचित्तस्यापीत्यर्थः

17

अर्थस्य साधर्म्यस्य अभिधानमाहात्म्यातिशयरूपतया प्रतिपादनम् सदृशान्तरव्यवच्छेदेन सदृशान्तर
व्यावृत्तिबोधद्वारेण एतदेव विशदयति इंदुरिंदुरिवेत्यादिना इत्यं च सदृशान्तरव्यवच्छेदेति सूचनद्वा
रा उपमात्वद्योतनप्रयोजनवत्त्वादापाततो हृद्रोदनार्थवत्तद्वारमात्रतया सादृश्यप्रतिपाद-
नेऽपि नासंबद्धप्रलापतापत्तिरिति भावः उदाहरणान्तरमाह यथा वेति गगनाकारं गगनसदृशं
इवेत्यतः प्राक् युद्धमित्यध्याहार्यम् उदाहरणान्तरप्रदर्शने बीजमाह पूर्वोदाहरणेति वैपु-
ल्यादेरित्यादिपदात् गांभीर्यादिग्रहणं तयोः संग्रहः इत्यनन्वयप्रकरणम् अथोपमेयोपमां
लक्षयति पर्यायेणेति अयोगपद्येनेत्यर्थः वाक्यभेदेनेति यावत् उपमानोपमेयत्वविव-
क्षितत्वविशेषोऽत्रापि बोध्यः उपमेयोपमेति लक्ष्यनिर्देशः उपमेयेनोपमेति व्युत्पत्तेः ध
र्मीर्थ इवेत्युदाहरणम् अर्थोधनम् पूर्णश्रीः पूर्तिसमृद्धिः अत्र च धर्मार्थयोर्वाक्यभेदेन उ
पमानत्वमुपमेयत्वं वर्णितम् तत्राद्यवाक्येऽर्थस्योपमानत्वं धर्मस्योपमेयत्वम् द्वितीये तु त
द्विपर्यासेन धर्मस्योपमानत्वमर्थस्योपमेयत्वमिति लक्षणसमन्वयः उपमानोपमेयत्वमा-

मात्रोक्तौ अनन्वयेति व्याप्तेर्द्वयोरित्युक्तम् एवमपि त्वमत्त्वं शारदि शारदिप्रावृषेण्ये कुमुदतारका द्व
मध्य विश्रान्तसादृश्यामुपमायामतिव्याप्तिस्तत्र द्वयोः कुमुदतारकयोः सादृश्याश्रयत्वरूपोपमे
यत्वस्यैव तत्तत्तिर्योगित्वरूपस्योपमानस्याप्यवगतप्रतीतेरतः पर्यायेणेत्युक्तम् अनन्वये ति
तिरिव भाति भातिरिव चेष्टा चेष्टेव कीर्त्तिरिति विमलेत्तिरसनोपमायां मतिव्याप्तिः तत्र द्वयोर्म
तिचेष्टयोः वाक्यभेदेनोपमानोपमेयत्ववर्णनादिति चेन्न द्वयोरित्यनेनैकस्यैवोपमानोपमे
यत्वस्य विवक्षितत्वात् अन्यथा पर्य्यायपदेनैवानन्वयवारणे तद्वैयर्थ्यापत्तेरिति संक्षेपः
ननूपमाप्रतीपयोः यद्रूपाया उपमा तद्रूपाया उपमेयोपमायाश्चालंकारान्तरत्वे किं बीजमि
त्याह द्वयोरिति तथा चार्थविशेषद्योतकतया चमत्कृतिवैलक्षण्यमेव तत्र बीजमिति भावः
सध्या कथं तर्हि तयोर्व्यवच्छेदलाभस्तत्राह धर्मोऽर्थयोरिति धर्मार्थयोर्मध्यगृत्यर्थः युक्तः पूर्वेण तथा
च प्रागस्य पुनर्वचनम् तदितरपरिसंख्यार्थमिति न्यायादिहापि ततीयसदृशव्यावृत्तिलाभः
खमिवेति प्रारब्धवर्णनमिदम् खमाकाशमिव जलम् कालुष्याभावेन निर्मलत्वातिशयात् यो

कु॰टी
१॰

दंस्यप्रथम निर्मलत्वादिपदेनश्वेतत्वातिशयप्रतिग्रहः गिरिरिवेति अत्रगजः प्रकृतः अयमितिप्रकृ
तपरामर्शिसर्वनामनिर्दिष्टत्वात् अतएवोपक्रमादग्रेप्यस्यमदधारैत्यन्वयोबोध्यः अत्रपूर्व
र्द्धे उच्चकैर्विभातीतिसमानधर्मउपात्तः उत्तरार्द्धेलुप्तवतीतिसंक्षेपःइतिदिक् इत्युपमेयोपमा॥ प्र
काशम् प्रतीपमितिलक्ष्यनिर्देशः ननूपमानोपमेयभावस्यवैवक्षिकतयामुखेन्दोरप्युप
मानत्वसंभवात् चंद्रइवमुखमिति उपमायामिति व्याप्तिरित्यतआह प्रसिद्धेति प्रसिद्धोपमा
नस्योपमेयभावः उपमेयत्वंप्रतीपम् प्रतीपपदवाच्यम् कुतः प्रातिलोम्यात् प्रसिद्धोपमा
नप्रतिकूलत्वात् उपमेयभावप्रातिलोम्यादिति अविशिष्टपाठेपि प्रसिद्धोपमानस्योपमे
यभावस्यप्रातिलोम्यादुपमानप्रतिकूलत्वादुपमानस्योपमेयत्वकल्पनम् प्रतीपमि
त्तिव्याख्येयम् नतुप्रसिद्धस्योपमानोपमेयभावस्यवैपरीत्यादितिप्राच्याश्रुतरीत्या एवंप्रवि
यप्रातिलोम्यस्यतृतीयपंचमप्रतीपभेदाव्यापित्वेनप्रतीपपदप्रवृत्तिनिमित्तत्वायोगात्
एवंचोक्तप्रकारेणोपमानप्रातिकूल्यस्यप्रतीपपदप्रवृत्तिनिमित्तत्वकथनेनप्रसिद्धोपमा

राम
१॰

न प्रतिकूलो धर्मः। प्रतीपमिति प्रतीपपंचकसाधारणं सामान्यलक्षणमिति सूचितम्। अत एव पंचमप्र
तीपव्याख्यानावसरे वक्ष्यते उपमानप्रातिलोम्यादिति प्रतिकूलत्वं च तिरस्कारप्रयोजकत्वमे
च तस्यैव सकलप्रतीपभेदसाधारणं तत्र तत्र स्फुटीकरिष्यते यथा वेति प्रोषितस्य प्रियं प्रति वियो
गवेदनानिवेदनमिदम् अयि प्रिये त्वदीयसादृश्येन विनोदनं विनोदो विरहयापनम् तन्मात्रमपि
मम दैवेन न सह्यते एतदेव दर्शयति यदित्यादिना त्वन्नेत्रयोः समाना साधारणी कांतिशोभा य
स्य तत्पाविंद यदिंदीवरं तत्सलिलेमग्नं वर्षर्तौ जलवृंदैः तवमुखस्य च्छायया कांत्यानुकारी स
दृशः शशी मेघैरंतरितः तिरोहितः ये पि त्वपि भिन्नक्रमः तद्गमनसदृशगतयो ये एते हंसास्ते गताः
ति अत्र कांतीत्यादि धर्मोपादानात् पूर्वोदाहरणवैलक्षण्यं बोध्यम् ननूपमानादुपमेयस्याधिक्य
वर्णन रूपाद्व्यतिरेकादस्य को विशेषः उच्यते तत्र वैधर्म्यप्रयुक्तमुपमेयस्याधिक्यं विवक्षितमिह तू
पमानतामात्रप्रयुक्तत्वात् साधर्म्यप्रयुक्तमिति प्रतीपांतरमाह अन्योपमेयेति अन्यदवर्ण्यमुपमा
नं तद्रूपं यदुपमेयं तस्य लाभेन वर्णनीयस्य मुखादेश्चन्द्रो गर्वपरिहारोपि तत्प्रतीपमित्यर्थः तस्यार्थप्रस
क्तिपूर्वकत्वेनोपमेयतायाः अपि पूर्वमप्राप्ता उपमानतिरस्कृति विशेषप्रयोजकत्वादिति भावः।
अत एव लाभेनेत्युक्तम् ननु सत्वेनेति अप्राप्तप्राप्तिलीभशब्दार्थत्वात् विच्छित्तिविशेषश्चमत्कारोत्क

कु॰टी॰ ऽर्थः उत्कर्षीत्योपमानतिरस्काराऽतिशयप्रतीतेरितिभावः गर्वमिति असंबाध्यं संवहनाय योग्यमपरिमितम् इ ११
तियावत् मद्गृहे मनसि ति संबोधनम् नन्विति हेत्वर्थे ऽव्ययानामनेकार्थत्वात् पूर्वोदाहरणेऽक्रान्त्वेतिसमा
नधर्मोपादानमिहत्वनेतिभेदः वर्ण्योपमेयेति अन्यस्यावर्ण्यस्यानादरोपि तथाप्रतीपमिति भावः (
अहमेवेति मुदाहरणानामिति तीव्राणां गुरु १ ग्रीष्मः तातेति हानुकंपसंबुद्धौ मास्मदर्प्यः दर्प्यमात्रु
याः २ वर्ण्येनान्यस्येति निरूपितत्वं तृतीयार्थः वर्ण्यनिरूपिताया अन्यस्यावर्ण्यस्योपमानस्या
द्युत्यर्थः अनिष्पत्तिवचः उपमानिःपतिवचः करिष्यामिहितत्त्वस्तीयावैत्त तत्प्रतीपम् मुधेति किले त्या
ति वार्तायां त्वन्मुखेनाम्भोजमितिवार्तामुधानिःप्रयोजनोपवादः अलीकार्थकत्वे तापवादस्येति
प्प्रयोजनत्वं उत्कवेति उपमानतिरस्काराऽतिशयप्रयोजकरूपेत्यर्थः मुधापवादत्वोक्तेरुकार्थ
मेतत् आकर्णयेति वचनीयमलीकतमानिंदितमत एव मुधेत्युक्तम् लोकांतरे मुखे सन्निधाने
न विशेषादर्शनादलीकत्वाग्रहायोगात् सन्निधानेपि विशेषाग्रहणात् पामरीत्युक्तम् अत्र वचनी
यग्रामीत्येताभ्यामुपमितेरनिष्पत्तिः प्रकाशयते प्रतीपमिति कोर्थः प्रयोजनं यस्य तत्तथा अनर्थमिति
यावत् तस्यभावः कैमर्थ्यं तदपि प्रतीपमन्वते अलंकारिकोऽतिशेषः ननूपमानस्य पप्रवंशाद्दरल्ला
द्विशेषरूपप्रयोजनसत्वात् कथमनर्थकत्वमत आह उपमेयस्येवेति उपमानपूर्वहेतुत्वेन उपमान राम
११

२२

कार्य्यकारित्वेन अयंचोपमानकैमर्थ्यहेतुः अतश्चोपमानकैमर्थ्यमित्यस्याह यर्थेति आल्हादविशेषादेरुपल
भूतत्वेनप्रयोजनत्वासंभवात्कैमर्थ्यमितिभावः उपमानप्रयोजकपूर्वहेतुत्वेनेतिपाठे उपमानप्रयोजनैरेव कं
स्येतिबहुव्रीहिः ननूपमानकैमर्थ्यस्योपमानादेपयुष्टादेपद्दति वामनसूत्रेण तेषां लोकात्त्वेनोक्तत्वात्।
कथंप्रतीपत्वमतआह प्रातिलोम्यादिति उपमानप्रतिकूलत्वादित्यर्थः प्रतिकूलत्वं चतिरस्कारप्रयो
जकत्वमित्युक्तम् तथाचप्रतीपसामान्यलक्षणाक्रांतत्वात् प्रतीपोत्तमभेदएवोचित इतिभावः तदोजस
इति नैषधीये नेषधवर्णनमिदम् विधिर्वेधसा तस्यनलोजसः प्रतापस्य तपशश्चस्थितोसत्यामिषोच्च
दृसूर्य्यौ वृथेति प्रतापज्योत्स्नादेः कार्य्यस्यतापाभ्यामेवोपपत्तेर्निरर्थकाविति चितेयदापदाकुरुते तदाभातो
विधोश्चपरिवेषस्य परिधेः कैतवात् कूलांकुरुनातोवैयर्थ्यसूचिकां रेखां वोवेष्टनां ततोतीत्यन्वयः अत्रच
नायंपरिवेषः किंतुकुंडलमेत्यपन्हुतो कैमर्थ्यरूपप्रतीपस्यांगत्वात् तयोरंगांगिभावलक्षणः संकरः।
यद्यप्यपमित्यादिवत्तच्चतत्परेवौपम्याभावमकरणेनदोषइतिबोध्यम् केचित्तुद्विप्रभृतयः अनन्वयोपमे।
योपमाप्रतीपानामिति प्रतीपपदेतत्रात्रापभेदत्रयमेवगृह्यते नतुवंत्यभेदद्वयमपि तत्रोपमितिक्रियानि
पत्तेरभावेनोपमांतर्भावस्यासंभवात् वस्तुतस्त्वाद्यभेदत्रयस्यापि नोपमांतर्गतिर्युक्ता चमत्कारंप्रतिसा
धर्म्यस्याप्राधान्येनाप्रयोजकत्वात् साधर्म्यनिवेषनउपमानतिरस्कारएवहितत्रचमत्कृतिप्रयोजकतया
विवक्षितो ननु साधर्म्यमेवसुत्वेतश्चमत्कारितया विवक्षितमिति सहृदयसाक्षिकम् एवमनन्वयोपमेयो

पमयोरपि न सादृश्यस्य चमत्कारितया प्राधान्येन विवक्षा किंतु द्वितीयतृतीययोः सदृशव्यवच्छेदापत्तयेति न तमो
पमेयोपमान्तर्गतिर्युक्ता अन्यथा सादृश्यवर्णनमात्रेणोपमान्तर्भावे वैयर्थ्यं लावण्यगांभीर्यप्रमुखेष्वमुदत्व
नः गुणेषु तुल्यवस्तुवपुषे वे दृष्टान्तेति व्यतिरेकालंकारस्य उपमातो गतिः स्यात् तत्र साधर्म्यसमानाधि
करणं वैधर्म्ये तु न चमत्कारप्रधानं न तु साधर्म्यमिति चेत् तुल्यमिदं प्रतीपादिष्वपि इति सहृदयैराकल
नीयं एतदेवास्वादसबीजमभिसंधायोक्तं केचिदिति अन्ये इति अत्र चास्वादसबीजं प्रागेवावेदितम्
इति प्रतीपप्रकरणम् रूपकं लक्षयति विषय्यभेदेति रूप्यते इत्यत्र व्युत्पत्त्या तत्पात्रास्यते धर्मोऽत्र नेने
ति रूपम् तद्रूपमस्यास्तीति तद्रूपत्वस्वभाववत्ताद्रूप्यम् चंद्रकार्यकारित्वादि विषयिण उपमानस्य
अभेदताद्रूप्याभ्यां विषयस्योपमेयस्य यत्तं जनमिवारंजनं स्वोपरक्तबुद्धिविषयीकरणमिति याव
त् तद्रूपकमित्यर्थः रूपकं तद्दित्येव पाठः रूपकं त्विति पाठे तु तदित्यध्याहार्यम् उपात्तविंबावि
शिष्टविषयधर्मिकाहार्यारोपनिश्चयविषयीभूतमुपमानाभेदताद्रूप्यान्यतररूपकमिति तु नि
ष्कर्षः मुखं चंद्र इत्यादौ नामार्थयोरभेदान्वयव्युत्पत्तिवशात् आहार्यचंद्राभेदनिश्चयाल्लक्षणा
समन्वयः मुखमपरश्चंद्र इत्यत्र तु न चंद्राभेदो विषयः अपरे इति भेदस्य विवक्षितत्वात् अपि

तुनेत्यर्थः वैरायत इति वैरं करोतीत्यर्थे शब्दवैरकलहाभ्रमेघ्या करण इति क्यङ्
प्रत्ययः इति कुचयोर्ध्वं त्येधरणार्थे कनकस्य दामाभिरन्तुभिरिति। निगीर्णाध्यवसान
रूपातिशयोक्त्यावलीभिर्वद्धः किमित्यर्थः तापइति अत्र कर्त्तृ तापः वकुधात्वत्र
रणेनैकं प्राप्तं तोपि जले तपस्यति तपः करोतीत्यर्थे कर्मणो रोमंथतपोभ्यां वर्ति
चरोरिति क्यच् तपसः परस्मैचेति परस्मैपदम् लक्षणं परिकुरुते अन्यधर्मेति
अन्यस्य विषयिणो योधर्मः तत्संबंधरूपेणानिमित्तेनान्यस्य विषयस्य तादा
त्म्येन विषयिणस्तादात्म्येन संभावनमित्यर्थः अन्यस्येति प्रप्रसर्पो विषयता
धर्मितारूपा विषयिणं सम्बन्धार्थस्तु विशेषणरूपा विषयता अन्यत्वेनो कीर्तनं

चसंभावनाहार्य्यत्वासूचनाय तच्च यावद्विषयनिष्ठधर्मसंबंधप्रयुक्तविषयधर्मि
कं तादात्म्यसंसर्गेण विषयि विधेयमाहार्य्यसंभवनं तन्नोद्दितीति पर्य्यवसितं तन्नि
ष्ठधर्मसंबंधप्रयुक्तमाहार्य्यतत्संभावनापि तितु निष्कर्षः इतरांशस्यव्यावर्तक
तया स्वरूपकथनमात्रपरत्वात् मुखे चंद्र इत्यत्र मन्ये इत्युत्प्रेक्षादापाच्चंद्रनिष्ठाल्हाद
कत्वादिधर्मप्रयुक्तं मुखे चंद्रसंभावनमाहार्य्यमस्तीति लक्षणसमन्वयः बाधा
यभावदशायां तु ज्ञायमानानां मुखादौ चंद्रादिसंभावनानां नोद्दैतीति तद्वारणाया
हार्य्येति एतेन विरक्तसंध्याकपिशं पुरस्ताद्यथा रजः पार्थिवमुज्जिहीते शं
के हनूमत्कथितप्रवृत्तिः प्रत्युद्गतो मां भरतः ससैन्यः इत्यत्र रजो ऽनुमरूप

समस्तेऽप्रस्तुतत्वधर्मसंबंधप्रयुक्तायांभर तेन तत्संभावनायामपि नातिव्याप्तिः तस्या
अनाहार्यत्वात् संभावनं यदीत्थं स्यात् इत्यत्रैहो ऽस्वप्यासिद्धये इति वक्ष्यमाणसं
भावनालंकारविषये यद्विशेषो भवेदुक्ता कापितास्य गर्गणांतरे त्यादावतिवारणाय
प्रयुक्तांतं सर्वातिशयसौंदर्यशंके सत्यवतीमुखं येन सा मृगशावाक्षी सावित्री
तरलीकृतेत्यादावतिसंसर्गवारणाय तन्निविष्टेति संभाव्यमानवृत्तित्वं धर्मवि

ली शेषणम् तत्र सावित्रीतरत्वंकारकरूपोपमेयमुखवृत्तिर्न तु संभाव्यमानवृत्तिरिति
नातिप्रसंगः इति वस्तुहेतुफलात्मतावस्तुफलहेतुत्वोत्प्रेक्षा नतु संबंधांतरेणो दा
त्प्रेक्षापा अप्रसंगः इति चेन्न सर्वत्राभेदेनैवोत्प्रेक्षणमिति प्राचीनमतानुसारे

स्यमभिधानात् एतेनसूत्त्वनापैवलक्षणः अचेतनादात्मोपादानमिति नन्वलं
कारस्सर्वस्वकारादिभिः स्वरूपोऽभिन्नासैवस्वरूपोऽभेदेनेत्यर्थः इति स्ववहृतापास्तु
रीपापा अपिसत्त्वाञ्चिपेत्तुक्तमित्याशंक्याह अत्रेति आसांमध्येपाप्रथमाव
स्तूत्मेत्तौसौवरूपोऽभेदेत्यर्थः विस्तृत्वरस्येति प्रसरणशीलेत्यर्थः तमस इति
संभवितेत्येनान्वेति षष्ठ्यां विषयता तमोविषयेत्यर्थः प्रतिरोधकत्वादीत्या
दिपदात् प्रसरणशीलस्यसंग्रहः प्रयैःप्रतीभिर्विघटिता विमुक्ताः आपनस्ये
ति षष्ठ्यां तस्यपूर्ववदुत्प्रेक्षापदेनान्वयः एवमग्रेतनस्य तमस इत्यस्यापि अ
नुपादानादिति विषयिबाधकाभ्यां लिंपतिवर्षतिभ्यां शङ्कापलेपनवर्णी   राम

यो: साध्यवसानलक्षणयाचलाधारणपुरस्कारेण व्यापनस्य चोपस्थापनस्य
पुराणपद्धतिरूपविरोधेनासंभवादित्याशय: स्वर्ते निरुक्तस्य ते: उत्प्रेक्षणी
यतया उत्प्रेक्षाविषयतया अन्यत्रोत्प्रेक्षायां अन्वयासंभवादिति निराकांक्ष
त्वादितिभाव: अत एव आख्यातार्थस्य कर्तु: क्रियोपसर्जनत्वेनान्वयासंभ
वादेव क्वचिदत एवेत्युत्तरमप्यपेव व्याख्यानं अंश: प्रमादलिखितो दृश्यते
स्याम्रुतनइति गुणाभ्रजइत्यर्थ: स्वाक्रियेति क्रियां प्रतिसाधनत्वेनान्वितइत्य
र्थ: व्यपेक्षितु माकांक्षितु नालं न समर्थ: तथा च निराकांक्षत्वादुपमानत्वे
नान्वयोन संभवतीतिभाव: एतेन भास्तिलेपनकर्तृत्वमुत्प्रेक्षितत्वाच्च एवं

29

चमपावभूतलेपतत्क्रियागोचरसंभावनैवानिर्णीतव्यापकविषयेतिसिद्धम् नचपुरा
पद्धतिरूपविरोधःशंक्यः तदनभ्युपगमात् केचिदिति मनइतिवास्त्वरसोद्भावनम्
तद्बीजंतु तमोनभसोः कर्तृत्वेन विषयत्वेनचवारद्वयमन्वये क्लेशः तथापर्युक्ते
नासाधर्म्यप्रयुक्ता केचिदिति मनइतिवास्त्वरसोद्भावनम् तद्बीजंतुधर्मीत्रेद्धातुत
त्सहचरीतद्धर्मसंबंधप्रयुक्तेतिलक्षणाननुगमः नचतन्निष्ठतत्समानाधिकर
णान्यतरत्वेनधर्मविशेषणान्ननुगमइति वाच्यम् सर्वत्रसादृश्यनिमित्तापादकत्वे
नापाःसंभवेनान्यमरत्वादिनिवेशप्रयुक्तगौरवस्यानुपादेयत्वादिति हेतुत्वेने
ति हेतुरूपतयेत्यर्थः हेतुत्वसंभावनाहेतुरूपतासंभावनाफलत्वेनफलरूपत यम

याएवमग्रेपि वाच्यम् तच्चोदाहृतमास्मभिर्लक्षणवोधप्रकारः प्रदर्श्यते तन्मुखम

लोमइत्यादौ कोकांगनादिरहानलक्षणं वाधितमुखत्वोपस्थिनत्तमोविषयासंभाव

नेति वोधः नामाथयोरभेदान्वयात् एवं मुखं चंद्रमस्येइत्यादावपि नूनं मुखं चंद्र

इत्यादौ चंद्रप्रकारकसंभावनाविषयो मुखमिति वोधः मुखविषयाचंद्रप्रकारि

काच संभावना तादात्म्यसंसर्गिकैव तथानुभावात् चमत्कारप्रयोजकस्य संसर्गा

तरस्याभावाच्च नेयं चंद्रत्वप्रकारिका तस्य चंद्रोपसर्जनत्वात् एवं ध्रुवे वादिशब्दा

समभिव्याहारेपि वोध्यम् लिंपतीवेत्युक्तविषयोल्लेखोदाहरणेतु लिंपति ना

साध्यवसानलक्षणयालेपनव्यापनोभयसाधारणेन सांद्रमलिनीकारकत्वा

31

कु॰टी॰

३०

दिरूपेणोपस्थापिते तमोव्यापनेतादृशालेपनसंभावनान्वयात् सांद्रमलि[illegible]
रकं तमः कर्तृ कांगकर्मकलेपनप्रकारसंभावनाविषय इति बोधः । विंजनयो
रुपस्थापिते व्यापने तादृशसंभावनान्वय इति प्रदीपकृतः एवं वर्षातीत्यादाव
पि बोध्यम् विक्षेपणात् ध्रुवमित्यादिहेतू लक्षोदाहरणे हेतुः पंचम्यर्थः
तत्र चाभेदेन प्ररूत्पर्थान्वयः हेतोश्चस्वप्रयोज्याश्रयत्वसंबंधेन रतत्व
विशिष्टे तस्य प्रकारितासंबंधेन संभावनायां तस्याश्चविषयतयाचरयो
रन्वयः चयाचभूम्याधिकरणकविक्षेपणाभिन्नहेतुकरतप्रकारकसं
भावनाविषयावंयीति बोधः । नचतादात्म्यसंबंधेनेतिहेतुविधेयकत्वाभा

एम

३०

वाच्छेदकं हेतुतावच्छेदकता स्यात् किन्तु तादात्म्येन तथाविधरक्तत्वरूपोऽवच्छेदकतैवेति
वाच्यम् विवक्षितविवेकेन विशेषणे हेतुत्वभेदस्यावच्छेदकताणीयतया विशेषणं
प्रतिविशेष्यप्रभृत तस्यापि हेतोर्विधेयत्वोपगमात् मुखं चंद्र इत्यादिरूपकर
वानुयोगित्वमुखस्याभेदस्य विशेषणसंसर्गत्वाभ्युपगमेन च विशेषणे हे
त्वभेदभावसंभवात् हेतुविशिष्टत्वरूपोऽवच्छेदकतापामुखवतः प्रतीतावपि विव
क्षावशेन हेतुत्वावच्छेदकत्वेनैव व्यपदेशः यथा दध्ना जुहोतीत्यत्र मुखवतदापि विशि
ष्टहोमप्रतीतावपि विवक्षितविवेकेन होमेदापि विधेयत्वव्यपदेश इति बोध्यम्
न च तत्त्वप्रयोज्यत्वसंबंधेन स्वप्रयोज्या [illegible]त्वसंबंधेन वा हेतुरूपधर्मोऽवच्छेदकतैव

रक्तादौ स्त्रीक्रियतां कृतमीदृशाकल्पाना-त्कोशेनेति वाच्यम् धर्म्मभेदांगीकारे दूष
णस्य प्रागेवावेदितत्वात् अतएव रूप्याल्लग्नमन्येत्यत्र तन्न तुल्येपादयोः पद्मलक्ष्मी
रितिहेतूत्प्रेक्षामुदाहृतवतः प्रकाश कृतोपि तत्र रूपहेतुकलग्नत्वतादात्म्यसंभा
वनमेवं स्वाभाविके लग्नत्वेभिमतम् अस्मद्गुरुभिस्तु किरीत्या तुल्यलक्ष्मीरूपे विषयेपद्यो
क्तरूपहेतुलग्नतादात्म्यसंभावनमुचितं लग्नस्य धर्म्मोपसर्जनत्वेन संभावनाया
मन्वयायोगादित्यपेयम् एवं च मुखं कांभेकूपेत्यादि विषयहेतूत्प्रेक्षायामपि
बोध्यम् विषयासिद्धत्वासिद्धत्वाभ्यां बोधे विशेषाभावात् मध्यः किमित्यादि
कालोत्प्रेक्षास्य लेफलं चतुर्थ्यर्थः तत्र चाभेदेन प्रकृत्यर्थान्वयः पूर्ववद्राम

स्फलस्यप्रयोजकत्वसंसर्गेण गरुत्वेन द्वारां केणतेनैव वद्धे वान्वयः तथात्म

संसर्गक संभावनापामध्ये विषयतयाएवं च धारणाभिन्नफलककँदामक नक

रणकवत्वैः अन्वासप्रसंभावनाविषयामध्यरतिबोधः एवं प्रायो ज्ञापित्यादा

वपिफलं तु मनोरथः इति पूर्ववदेव बोधकलोक्तत्वं चोपदर्शितरीत्यो

पपादनीयमिति वहुवक्तव्योपि विस्तरभयादुपरम्यते वालेंदुवक्राणीति

नाविचतेविकाशो येषां तान्यविकाशितानि तेषां भावादिकारहितत्वाद्धे

तो वालेंदुवत्कुटिलीयाचंद्रवक्राणि तथातिशयेन लोहितान्यारक्तानि

पलाशानि पलाशकुसुमानि वसंतेन नायकेन समागतानां वनस्था

लीनां गनानाम् सद्यस्तत्कालसंभूतानि नखक्षतानीव भुः शुशुभि

रे इत्यन्वयः पूर्वेति ... मस्तो मसमित्यत्रे त्यर्थः ननु लोकोसंभावनाया

मिवशब्दो न इष्ट इत्यत आह आसिन्चेति पिनद्धीचेति समुद्रस्तरंगा

35

णामन्यभागे: केनरूपचंदनं पिनष्टीव इंदुस्तत्केन चंदनमादायकरैः किर
णरूपामंगनां लिंपतीवेत्यन्वयः समुदीपतां नेति सन्द्रस्योपांते तद्द्यत्के
नचंदनं तत्कतंयतातां दिशांहेयनं तत्केनेत्यर्थः उभय ओउभयोरुत्प्रेक्षो
योः येषामलंकारसर्वस्वकारादीनां राज्ञाविति सम्र क्रांतोभूमिपः भूमो
राज्ञौ रवेरभावात् हेतोः दिवदिवा चंद्रोर भावाद्धेतोः दिवसनतं निरं तरमु
दितेमतापपद्मासी इत्यवान्निर्मितवानित्यर्थः रजनाविभयदाहरणेभा
वरूपो हेतुरिहत्वभावरूप इतिभेदः विवस्वतेति विवस्वतासहस्रपेण
स्वस्वगोसहस्रेण किरणसहस्रेण समंमि आमिता जननानां नेत्रा
परनामधेया गावोपि आनापिषतेवनीता इव यथागोपालेनप
रकीयाभिर्गोभिर्मिश्राः स्वकीया गावोनीयंते तथागोपदवाच्याज्ञ णाम
साजात्येन मिश्रता विवस्वता यिनीता इवेत्यर्थः खलुसंभवना

36

पां। तेन पतनेन हेतुना इदमाध्यं नवं प्रकारो इत्यन्वयः गोःस्वर्गो[illegible]वलीव
र्दैरश्मो च कुलिशोऽस्मान् सोऽरमेपीदुग्धाण्यादिग्वाभूत्स्वप्सुभूम्नि चेति
मेदनी [illegible] अत्र च नापि विपत्ते वेति विषयोत्प्रेक्षणपूर्वकं तस्य हेतुत्वेनो
त्प्रेक्षणमिति पूर्वस्माद्भेदः एवं त्वन्मुखांभोरुहेति गुणस्वरूपो हेतु इत्यु
क्तिपाद्रूपः इत्यपि द्रष्टव्यम् अत्र चोत्प्रेक्षास्वरूपे सत्वेऽपि हेतूत्प्रेक्षायाः
प्राधान्यात् तत्वेनैव व्यपदेशो न तु स्वरूपोत्प्रेक्षात्वेन तस्या अंगत्वात् ए
मन्यत्रापि बोध्यम् [illegible] अयं विधुस्त्वं दुः पयोधेः पूरं वर्धयितुं ए
णांकमणीं चेंद्रकांतं किं पतिलोको[illegible] परामितितानि पयांसि दोग्धी
ति शंके तच्चापि पैः पतिभिः प्रयोगे सति स्वःश्लोकको कांगनानां नप
नेकर्मभूते किं पं ति पयांसि दोग्धीति शंके इत्यन्वयः ऊहेति कर्मकत्वा
त् एणांकमणिमिति द्वितीया एवं नयने इत्यत्रापि मध्यः किमितिप

37

कु॰टी

३२
पूर्व

नैकस्य वस्तुन फलत्वेन कार्यत्वे तेन तु भेदाणामि उनुग्रावणमावणपो:
फलत्वेन वर्द्धनामितिभेदः वृत्तणं वर्द्धितं नंतदा वर्द्धन कालेतेन चंद्रगार्घ
स्थितानामितिरवि रवोस्थितानां विभुक्तानां पुरातनानां वाहनाना
श्ववर्त्तनांपरिवर्तनापि वनुरंगोत्तमानामुत्पन्निहमतोऽतरस्यां दिशि प्र
तस्थे इत्यन्वयः आपोजननमित्यस्य रोकस्य ग्गणस्य फलत्वेनोक्ते
वाणमरुहनुपरिवर्तनं किंपापाइतिभेदः नन्वलंकारसर्वेश्ववका
रादिभिरन्येषामपि जात्यादिभेदानामुक्तत्वात् कि तत्तेन प्रदर्शिता
इत्याशंक्याह एतावतेति उक्तभेदा एवेत्यर्थः उक्तेदा इत्येनंतरं च
मत्कारविशेषप्रयोजिका इति शेषः तथा च जात्यादिभेदानां चम
त्कारविशेषानाधायकत्वादप्रदर्शनमिति भावः उक्तेदतीत्येने
नउक्तेत्तावोधकत्वेनेत्यर्थः त्वत्कीर्तिरिति अत्र चानुपात्तस्व

३२

38

॥ र्मिनविषयकावर्ग गामवेशतादात्म्यो भेदा विशेषीभू तन्मम ण स्त्रां
तत्वरूपहेतू भेदावामतीयइतिवोध्यम् ॥ २ ॥ अभेदाप्रकारणाम ॥ अतिश
योक्तिं लक्षयति रूपकातिशयोक्तिरिति ग्रहणमुपस्थापयन्न म विषय
रूपतयेति विषयिणो रूपमस्य तत् ॥ स्वभावस्तत्तायेत्यर्थः रूपं चाभे
दे तादूप्यान्यतरत तस्मिन्सतीति समभीसमर्थी नासीरित्यभिप्रायेण
एवं चानुपात्तविषयधर्मिकाहार्यनिश्चय विषयीभूतं विषयभेद
तादूप्यान्यतरत रूपकातिशयोक्तिरितिलदणमवोध्यम् अत्र रू
पकवारणायानुपात्तेति अपमेवच रूपकादस्य विशेषः अतिश
पा ॥ २ ॥ स्यच्यते भ्रातिवारणायाहार्येति ३ भेदावारणाय निश्चयेति नीलो
त्पलेनोपस्थितकामिनीनयने शक्त्युपस्थितस्य नीलोत्पलत्ववि

श्लिष्टत्वस्याभेदसंसर्गेणान्वयः शान्तिरुपस्थितयोः कृतीक्ष्णतापनयोरिव शक्ति
लक्षणाभ्यामुपस्थितयोरैक्ये पदार्थयोस्तात्पर्यविषयेनान्वयांगीकारे
बाधकाभावात् एवं च नीलोत्पलाभिन्नकांतिविशेषवद्वदादितिबो
धादिपममभेदातिशयोक्तिरित्युच्यते नचैवं सतिरूपकभेदवैलक्षण्य
मिति बोध्यम् रूपकं हि मुखेभेदव्याप्यस्य विषयः तावच्छेदस्य भानेन वैल
क्षण्यस्य स्फुटत्वात् पदान्तमेकेनेनतात्पर्यम् किंतु भेदभावने तदाकां
ति विशेषादिरूपस्यैव बोधात् ताद्रूप्यातिशयोक्तिर्लक्ष्यते इति बोध्यम्
वाचीति मध्यभागमारभ्यमुखेपर्यंतं नापि कावर्णनाभि दम गमने
सूक्ष्मातिपातरद्गुल्लन्त्येमध्ये क्वाप्यनिर्वचनीयं ज्योभावापीतद्धर्मभी
राना मिः स्फुरति शोभते तत्परं तदूर्ध्वभागे ऐंद्रनीली इंद्रनीलघटिता एत

40 11

रूढत्वमुपमासरणिलक्षणस्य याऽस्तु शोभावली स्फुरतीत्यनुषज्यते । किंभू-
ता कांचननिर्मितां सोपानपंक्तिं तामस्मात्रिवली आपिगन्तव्याती प्राप्तव-
ती तथा जेतव्यदेशोशैलौ नक तुंगौ विशालौ कुचौ स्फुरतस्तीति विभक्तिवि-
परिणामेन संबध्यते कीदृशौ सुकृतीनां पुण्यवतां सुगमौ सुलभागम-
नौ पुनः कीदृशौ चंदनस्य हारिस्यंदनपंकेन कालकुन्नो व्याप्तो देशोप-
पोसता । प्राभृतौ तत्रत्यानां तदाश्लिष्टानां च सुधांशो ज्जलदा हृद-
कस्य मुखस्य संनिधानात् अमृतं तद्धारा स्वाद्यमधरमाधुर्यं स्मृति-
त्यन्वयः । विधानां भेदनामितीत्यस्य दर्शनार्थं । मित्यनेनान्वयः । अति-
देशोनेति साहश्येनेत्यर्थः । मुख्ये रूपकाभेदस्यातिशयोक्तावभावा-
द्रूपकपदं रूपकध्वंसदृशापरं सत्समासमग्निहोत्रौ इत्यत्राग्निहोत्र

पदवत्त्वमिति दिशि कालमित्याशयः अत्रापि क्वचन्न नत्तेष्वत्रानुभयोरेकत्रोदाहर
णे मुख्यासिद्धतरत्वादनुपादानं बोध्यम् यत्तत्र केचिदुक्तं विषयिवाचकपद
स्य विषये साध्यवसानलक्षणायाः शाक्यतावच्छेदकमात्रप्रकारकत्वद्य
विशेष्यकबोधत्वं कार्यतावच्छेदकम् एवं च निगरणे सर्वत्र विषयिता
वच्छेदकधर्मरूपेणैव विषयस्य भानम् न विषयाभिन्नत्वेनेति स्थिते
ऽत्र भेदातिशयोक्तिस्तात्पर्यातिशयोक्तिरिति द्वैविध्यमयुक्तमिति तन्त्रो
ठिविलसितम् शाक्यतावच्छेदकस्य तद्ये पूर्वमप्रतीतत्वेन तद्विशि
ष्टतया लक्षणायाः असंभवात् पररूपविशिष्टे शाक्यसंबंधग्रहः न
रूपप्रकारकत्वद्योपास्थितेः समानप्रकारकशाब्दबोधे हेतुत्वात् ल
लक्षणापरिहार्या तत्त्वानुपपत्तेः तद्वस्यापाच एवमपि तात्पर्यव

सौन्ता ईषाबोधांगीकारेन तद्वादेव शब्दाभेदप्रकारक बोधे बाधकाभावा
त् मात्रपदेन विषयतावच्छेदकस्यैव व्यावर्त्तनादितिदिक् समावर्द्धेति
विद्रुमशालभंजिका व्यापांनादिकायां स्फटिक प्राकार शिखरगतां म
गांकावली मालोकयता राज्ञो विदूषक प्रत्युक्तिरियम् प्राकाराग्रस
मीपेन पते प्रहिण प्रेप्प मनागीषत्तकेय मनाकाशेऽनंतरीद्रे को
यंश्यीत किरण श्चंद्रुइति मुखे चंद्रगत्ताल्हादकत्वादिरूपतारूप्याध्य
वसानं कीदृशः गलितः च्युतोहरीणो यस्मात् तथाभूतस्तेन निः
कलंकतयोत्कर्षाभिव्यक्तिः पुनः कीदृशः सुधायां बद्धः ग्रासः
तदभिलाषोयैस्तैरुपवनसंबंधिभिः चकोरैरनुसृतः लवली फ
लपाकस्यप्रणयिनी सदृशी महां त्वकांज्योत्स्नां तत्त्वेनाध्यवसित्तां

कु॰टी॰ कांतिं प्रभां किरन् प्रसारयन्नित्यर्थः लवलीलता विशेषो हरफारेवडी इति
३६ भाषया प्रसिद्धः प्रकाशेवरणः प्रगल्भ इत्यमरः समानच्छायासेति इति
क्वचित्पाठः तत्राप्युक्त एवार्थः नवलवलीति पाठे नवश्चासौ ल
वलीपाकश्चेत्यन्वयो बोध्यः ननु विहाभेदविवक्षेव किं न स्यात्त
इत्यत आह अत्रेति कोयमित्यनेनानिर्ज्ञातत्वप्रकाशनात् प्र
सिद्धस्य च निर्ज्ञातत्वात् तद्धेलक्षणपावगतिरिति भावो गमितः
गलितेत्यादि विशेषणं व्यंग्यत्वेनाभिप्रेतः अन्यत्रापीति अ
त्रुटिचा देवेरपीदलितो राहुदशनैः कलंकेनाथ्युष्पो नरवजप
रिभूत्ता दिनकृत्ता कुहूमिनी लिप्तो न च यु वतिचक्रेण विजितः

राम
३६

कलानाथ : कोयं कनकलतिकायामुदयते इत्यादाविति वर्थः अपवा

न्यत्रापिन्यूनतायामपीत्यर्थः कोयं भूमिगतश्चंद्र इत्यादाव हिव्यत्व

रूपन्यूनताप्रकाशनमूहनीयमितिभावः ननूक्तोदाहरणोष्वपति

तिविषयस्योपादानात्कथमतिशयोक्तिरितिचेत् अत्राह इदंत्व

स्यविषयविशेषणत्वेनविवक्षयामतिशयोक्तिरितिचेत् अत्र

एव यदाविषयविशेषणत्व विवक्षातदारूपकत्वमितिविवाद

स्या अतएवप्रकाशकृतादयामेरूपकातिशयोक्त्यादिसंदेहसंक

र नयनानंददायींदोर्बिंबमेतत् प्रसीदतीत्युदाहृतम् एतांविभजते

यद्यपन्हुतीति अपन्हुतिगर्भत्वे पर्यस्तापन्हुतिगर्भत्वे सेव रूप

कातिशयोक्तिरेव तथाचसापन्हववत्वनिरपन्हववत्वभेदेन द्विवि

कु॰ टी
३७

पातिप्रायोक्तिरितिभावः मुक्तानीति तानिअनुभवैकवेद्यानीमानि
वस्तूनि तस्मैजना विकल्पयंति सदसद्वेति विकल्पविषयाःन कुर्व
ंति येषांजनानां सानकांतादकूपपेलोचनमार्गोनास्तीत्यन्वयः तादृ
शाहं दर्शनेशालिनजन विकल्पयंतीतिभावः तानिकानिवस्तू
नितत्राह मुक्ता मौक्तिकम् विद्रुमं प्रवालं कांताया अनयोर्मध्ये मधुर
सः कांताया अधरो इति द्वितीयं पुष्पंपाषूर्व केवलं भावीहकम्
ननुमधुरसपूर्वकं नयोर्मौक्तिका विद्रुमयोः वस्तुनि प्रीतम शातपद्युति
मंडले एकाधिका एक स्मिन्नधिका वा अधिति एकाधिकरणामित्यर्थे
नत्वाएानिसमुद्रे तत्रचंद्रमंडलेच शंखमहाद्रिमस्ति

उदंच्चात्ति उदयंप्राप्तो त्ति नपुनः पूर्वबिलस्योदयगिरिरंध्रंतरे अत्रमुक्ता
विद्रुममधुरसप्रालेयप्रभृति मंडलपर्यवशाद्वे: क्रमेणदंताधर तन्माधुर्
र्यमुखवकंठानिर्गीर्णः पूर्वदिग्हरिणाक्षीतत्त्वोक्तास्यपद्मोपलहवः इन्दु
परेप्सूर्वेहमित्सुक्तमाग्रह इतिभेदः प्रालेयमितिहिकन्धित्यमरः गतात्त्वि
ति पुरेभवाः पोराः स्तोकांविलासिनीषु तिमीनांमत्स्यानां संघट्टनेन ससं
भ्रमंसभयं तीरंगतासुसतीषु पत्रनाम्यांक्षिप्रानदीउल्लसेत्तीनां फेन
ततीनां दूतेन मुक्ताः कृताः उत्तरहास्यंप्रपातश्यामूत्तेन विभातीत्यन्वयः
इत्तीति इत्यत्रेत्यर्थः इंदुतं उनादा वित्यादिश्वदात पुष्प परिग्रहः निवे
शनादभेदाध्यवसायात् ज्ञातेइति दमयंतीवर्णयितोनलस्योक्तिः आ
त्तिशायित्ताद्रागात् लोहित्यात् इदमपरस्वरूपमेवबिंबमितिजानेन

कु॰टी॰
३८

तुविंबफलमित्येवकारार्थः विंवस्याविंवफलस्य अतोस्माद्दोषादपरं त्वंनिकृष्टत्वं व्यक्तं स्फुटं कथंतर्हि विपरीतात्लोके प्रतिद्धिः तत्राह द्वयो रनयो रनयो विशेषस्यज्ञानं तस्यवोधे अन्नमाणामसमर्थानाम जनानां नात्भिभ्रमो विभ्रमः संभ्रमादिति अन्यत्रेति सूर्यकातके नेत्रापरपर्या यागोनपनेद्व्यर्थः निवेषितमुत्प्रेक्षितम् रवीति रविणासंतप्तोगजः तस्यरवेनमलात गृहेभवान वंधूनितिपावत भुक्तायः वाधितुंशः ॥ प्र विशति ननुस्त्रात्तेहि यस्मात् गजस्नानंनिःफलंनिःप्रयोजनमित्यन्व यः प्रसक्तउप्रसक्तेति अतिशयोक्तिः सापन्हवत्वकथनप्रसंगात् ।

अलंकारसर्वस्वकृदुक्तम स्वल्पो स्पेत्तापोवाद्वापन्हुतिगर्भत्वेनुक्तमेवं दर्शितम तदत्रसमासाच त्रिधात्वम्पुरत्सेद्वाषुपर्यस्तापन्हुतिगर्भ

पत्र
३८

त्वमित्यर्थः भेदकेति तस्येव तज्जातीयस्यैव अन्यत्ववर्णनं तज्जाती
यभिन्नत्वेन वर्णनम् तत्तात्पर्यं बोध्यम् एवमग्रेपि तेन भ्रांतो नातिव्याप्तिः
अस्यपतेर्गांभीर्यमनन्यदेवमस्तित्विगांभीर्यं भिन्नमेवेत्यर्थः अन्येप(
मिति रूपं सौंदर्यं वैदग्ध्यं चातुर्यं धोरण्यी परिपाटी एषानातिनपत्रा
ली विधेः साधारणीकृत्येत्यन्वयः अत्रोत्तरार्द्धे न भोग्या अन्यत्ववर्ण
विशेषः संबंधेति अयोगेऽसंबंधे योगकल्पनं संबंधवर्णनम् संबंधस्य
अभेदश्चाभिन्नत्वे सति अन्यत्वाधिनिरूपितोस्त्यासः तेनरूपकातिशयो
क्त्यादिप्रभेदेषु नातिव्याप्तिः सौधेति सौधोस्त्री राजसदनमित्यमरः न
न्क्तेव स्पर्शो विधुमण्डलमिती वसयोगेऽत्येद्रा प्रतीयते सादृश्ययोगेना(
न्योत्येत्तात्वमुचितम् इत्यादिमित्येवावाच्योत्येन्त्तासेवेवाधभावेगम्योत्ते

त्वेति नियमात् अन्यथा त्वत्कीर्तिभ्रमणश्रांतेति पूर्वोदाहृते पर्य
पि गाम्भीर्यत्वेद्वा नस्यात् विधेयाभावादिति चेन्नैवम् उपदर्शित
नियमस्यालंकारांतरविषय एवाभ्युपगमात् अन्यथा नूनं मुख
चंद्र इति नूनपदाप्रयोगे गाम्भीर्यत्वेद्वापत्तेः एवं च प्रकृते ऽसंबंधे सं
बंधवर्णनरूपा तिशयोक्त्यलंकारविषये नागाम्भीर्यत्वेद्वावसरः त्व
त्कीर्तिरित्युदाहरणेतु भ्रमणश्रांतत्वरूपहेतुत्वांशे गाम्भीर्यत्वेद्वाभि
प्रेता न तु स्वर्गगाप्रवेशांशे पीति सर्वमवदातम् असंदिग्धमुदाह
रणांतरमाह यथा वेति कतिपयेति वीरेन्द्र देवाख्ये वितरणशा
लिनि दानशालिनि सतीति चक्रवाकी इति मदं सतो घमुपयातिस्म

प्राप्नोतीति किंकृतं वा सरस्यावस्थानं नाशो येन सः कनकगिरिः सुमे
रुः कतिपयैरस्यैर्दिवसैः स्वल्पं प्रयायादिति संभावनायां लिङ् । यो
गेपीति योगे सत्यपि अयोगवर्त्तनमित्यर्थः स्वर्गस्य द्रुमाः कल
ल्पवृक्षादयः स्वर्द्रुमेष्विति विषयसप्तमी स्वर्द्रुमविषयैरादरः य
तस्य संबंधेपि अर्थ्यादर्थिषु यद्वा अर्थिषु स्वर्द्रुमविषयादरसं
बंधाभावप्रतीतौ तत्समानवित्तिवेद्यतया स्वर्द्रुमेष्वप्यादरवि
षयत्वाभावावगमात् यद्वा स्फुटमेव साधुः अनयोरिति अन
वद्यानिर्दुष्टानि अंगानि यस्य तत्संबुद्धौ भूते इति संबोधनम् जंभा
मारणयोः वर्द्धमानयोरनयोस्तनयोस्तव बाहुलतांतरे पर्य्याप्तः
अवकाशो नास्तीत्य[illegible]न्वयः अत्र वाहुलतयोरंतोस्तनपर्य्या

प्राकाशसंबंधेपितदसंबंधउक्तः अक्रमेति क्रमः पौर्वापर्यम् तदभा
वोऽक्रमः तद्रूपस्यातिशयोक्तेरित्यर्थः सहत्वे समकालत्वे आलिं
गंतीति समं युगपत् ज्यामौर्वीं पृथ्वीं च पराः शात्रवः मुंचंतीति
अंभीरसंज्ञकस्य वीरस्य खेङ्कैकोशं मुंचतिसति अपरोगावर्गः समू
होपिकोशं मुंचति भांडागारं त्यजति तस्या खेङ्कप्रकंपमुल्लासं भवति
सतिसः प्रकृष्टं कंपं भवति एवं खेङ्के दर्भा त्वां तिं त्यजति सति सोपि (
त्वां पृथ्वीं त्यजतीत्यर्थः कोशोह्ली कुञ्जले खेङ्कपिधानेष्वपि
दि तेइत्यमरः अत्र प्रातत्पत्यर्थाभावायोगपद्यवर्णनं विशेषः ..
धनागहेति धनसंबंधि निग्रहे वृत्त्यर्थः चपलेति हेतोः प्रकृति स्त्री (
नं तज्जन्यकार्य्यसत्तीत्यर्थः घा स्यामीति अदित्ते उक्ते प्रियेलोति (

रीरे भवः स एव शारीरकः आभ्यन्तरः अन्तर्निपादकेत्यर्थः अर्थवशात्प्रो
योजनवशात् पूर्वं पापादित्यागाभ्यां वेदोदितादि मार्गप्राप्तिपूर्वकप्र
प्राप्तेरसंभवेन पाठक्रमस्यार्थक्रमेण वाधादिति भावः इयापि
त इति सांप्रापेन तत्त्वाभावात्तत्पाठस्य इतिनानीवाधिकरणे सिद्धां
तत इत्यर्थः नाथ्येति हे नाथ विष्णोः त्वच्चरणेन वेमदालनरूपे
गंगाजले गंगारूपे लग्ना ये तेषां नखानां कांतिलेशकणकाः समुद्र
प्राप्ता एता एव काणिकां तस्य जलनिधेर्मथनेन सांद्रतां प्राप्तान्नू
नं सम्यदृष्टं वेधिनवनीतस्य चंद्रस्य पदं प्राप्ता स्वं द्रुरूपेण परि
णता इत्यर्थः तपातकारेण तदित्यनंतरं हेतुरिति शेषः तदेतुनं रव
कांत्युत्कर्ष इत्यर्थः अस्याश्चेदिति अस्या गात्रिसो कुमार्यं दृष्टं

चेदित्यध्याहारेणान्वयः एवं संलापो भाषणं यदि स्यात्तदा परभृतैः को
किलैर्वाचं प्रकृतीति वाचं प्रमत्तस्य भावो मौनं व्रतं साध्यता अ
कठोरता मार्दवं यदि दृश्यते न तदा मालती दृषत्सापेव पाषाणतु
ल्यैव लब्धत इति कांतिर्दृष्टा चेत्तदा लक्ष्मीः का पापवस्त्रमालेव
तामसाश्रयतां किमत्र बहुनोक्तेनेत्यन्वयः गत्यादिषु गतिसौंदर्यादि
षु संभाव्यमानानि तुल्यरूपमाणानि· पूर्वोदाहरणैर्लब्धुपमाह
एतानीति कार्याणीत्यर्थः लज्जेति पक्ष्मादीनां वेतसीपदिलज्जा
स्यात्तदा चमर्यो गोमृगाः पर्वतराजपुत्र्यास्तं रम्यकेशपाशं
